प्रथमा दीक्षा : सम्भाषणम्

## गृहिण्योः सम्भाषणम् - II

आसीत् -आसन्

आसम् - आस्म

शीला - हरिः ओम् गीते । अस्ति किं गृहे ?

गीता - ओः शीले । किं भोः दर्शनमेव दुर्लभम् ? कुत्र गतवती आसीत् ?

शीला - कुत्रापि न गता अहम् । गृहे एव आसम् । पञ्चदशदिनेभ्यः बहूनि कार्याणि । भवती अपि न आगतवती खलु ?

गीता - अहं, मम भगिनीपरिवारः मम पुत्री च तिरुपतिं गतवन्तः आस्म । तत्र अस्माकं गृहस्य पूजा आसीत् तत्र तु जनानां सम्मर्दः एव आसीत् । तत्सर्वं समाप्य ह्यः एव आगताः ।

शीला - मम गृहे पुरातनानि कानिचित् भग्नानि नष्टानि च वस्तूनि आसन् । तानि विक्रीय अन्यानि नूतनानि वस्तूनि आनीतवन्तः स्मः तदेव का4यम् ।

गीता - तद्दिने आपणगमनसमये मार्गे भवत्याः पुत्रः मिलितवान् आसीत् । सः उक्तवान् वत् मम जनन्याः गृहे बहूनि कार्याणि इति ।

शीला - स्वीकरोतु प्रसादम् । सुशीला अपि नास्ति नगरे इति मन्ये ।

गीता - सा तु नगरे एव अस्ति । ह्यः मम गृहम् आगता आसीत् ।

शीला - एवम् । आगच्छतु सा, सम्यक् तर्जयिष्यामि ताम् ।

गीता - अहम् आगच्छामि । अद्य मम गृहं प्रति मम माता आगच्छति । सा षड्दिनानि अत्रैव वासं करिष्यति अतः सप्ताहं यावत् नागच्छामि ।

शीला - तिष्ठतु भोः सर्वदा भवत्याः त्वरा । किञ्चित् तिष्ठतु ।

गीता - नैव, भवती अन्यथा मा चिन्तयतु । आगच्छामि पुनः ।

शिला - अस्तु तर्हि पुनर्मिलावः ।